# शिवरक्षा स्तोत्रं हिंदी लिरिक्स

शिवरक्षा स्तोत्रं,

चरितं देवदेवस्य महादेवस्य पावनम्।
अपारं परमोदारं चतुर्वर्गस्य साधनम्॥(१)

गौरी-विनायकोपेतं पञ्चवक्त्रं त्रिनेत्रकम्।
शिवं ध्यात्वा दशभुजं शिवरक्षां पठेन्नरः॥(२)

गङ्गाधरः शिरः पातु भालमर्द्धेन्दु-शेखरः।
नयने मदन-ध्वंसी कर्णौ सर्प-विभूषणः॥(३)

घ्राणं पातु पुरारातिर्-मुखं पातु जगत्पतिः।
जिह्वां वागीश्वरः पातु कन्धरां शिति-कन्धरः॥(४)

---

श्रीकण्ठः पातु मे कण्ठं स्कन्धौ विश्व-धुरन्धरः।
भुजौ भूभार-संहर्त्ता करौ पातु पिनाकधृक्॥(५)

हृदयं शङ्करः पातु जठरं गिरिजापतिः।
नाभिं मृत्युञ्जयः पातु कटी व्याघ्रजिनाम्बरः॥(६)

सक्थिनी पातु दीनार्त्त-शरणागत-वत्सलः।
ऊरू महेश्वरः पातु जानुनी जगदीश्वरः॥(७)

जङ्घे पातु जगत्कर्त्ता गुल्फौ पातु गणाधिपः।
चरणौ करुणासिन्धुः सर्वाङ्गानि सदाशिवः॥(८)

---

एतां शिव-बलोपेतां रक्षां यः सुकृती पठेत्।
स भुक्त्वा सकलान् कामान् शिव-सायुज्यमाप्नुयात्॥(९)

ग्रह-भूत-पिशाचाद्यास्त्रैलोक्ये विचरन्ति ये।
दूरादाशु पलायन्ते शिव-नामाभिरक्षणात्॥(१०)

अभयङ्कर-नामेदं कवचं पार्वतीपतेः।
भक्त्या बिभर्त्ति यः कण्ठे तस्य वश्यं जगत् त्रयम्॥(११)

इमां नारायणः स्वप्ने शिवरक्षां यथादिशत्।
प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यस्तथालिखत्॥(१२)

इति श्रीयाज्ञवल्क्य-प्रोक्तं शिवरक्षा स्तोत्रं सम्पूर्णम्।

समस्त भजनों के लिरिक्स और विडियो बिना इन्टरनेट के भी अपने मोबाइल में देखने के लिए गूगल प्ले स्टोर या एप्पल एप्प स्टोर से 'भजन डायरी एप्प' जरुर इनस्टॉल करे। वेबसाइट - https://www.bhajandiary.com

समस्त भजनों के लिरिक्स और विडियो बिना इन्टरनेट के भी अपने मोबाइल में देखने के लिए गूगल प्ले स्टोर या एप्पल एप्प स्टोर से 'भजन डायरी एप्प' जरुर इनस्टॉल करे। वेबसाइट - https://www.bhajandiary.com